# shrIve NkaTeshvarastutimaNimAlA

# શ્રીવેઙ્કટેશ્વરસ્તુતિમણિમાલા

## Document Information

Text title : Venkateshvara Stuti Mani Mala

File name : venkaTeshvarastutimaNimAlA.itx

Category : vishhnu, venkateshwara

Location : doc_vishhnu

Author : Pu. Ma. JoshI from Sangali

Transliterated by : Mandar Mali aryavrutta at gmail.com

Proofread by : Mandar Mali aryavrutta at gmail.com

Latest update : August 22, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીવેઙ્કટેશ્વરસ્તુતિમણિમાલા

વિશ્વં સર્વમિદં ચરાચરમયં યઃ સ્વેચ્છયા નિર્મમે
    તચ્ચૈતજ્જનનીવ રક્ષતિ સદા યઃ શક્તિમાન્ લીલયા ।
અન્તે નાશયતે દશૈવ નિખિલં યો દેવરાજઃ ક્ષણાત્
    તસ્મૈ નિત્યમિદં નમો ભગવતે શ્રીવેઙ્કટેશાય મે ॥ ૧॥

સ્તોતું યં પ્રભવન્તિ નૈવ નિખિલા વેદાશ્ચ શાસ્ત્રાણિ ષટ્
    ન બ્રહ્મા ચતુરઃ, સહસ્રવદનઃ શેષોઽપિ શક્તસ્તથા ।
વિદ્વાંસઃ કવયઃ સુકાવ્યનિપુણા ન પ્રાભવન્ યત્સ્તવે
    તસ્મૈ નિત્યમિદં નમો ભગવતે શ્રીવેઙ્કટેશાય મે ॥ ૨॥

ચન્દ્રોઽયં વસુધામિમાં સ્નપયતે સ્વીયૈઃ સુધારશ્મિભિઃ
    ધ્વાન્તં સર્વમિદં વિનાશ્ય ગગને દેદીપ્યતે ભાસ્કરઃ ।
મેઘો વર્ષતિ વાત્યયં ચ પવનો યસ્ય પ્રભોરાજ્ઞયા
    તસ્મૈ નિત્યમિદં નમો ભગવતે શ્રીવેઙ્કટેશાય મે ॥ ૩॥

આન્ધ્રે સુપ્રથિતે પુરે તિરુપતૌ યસ્યાગ્રજો વિશ્રુતો
    વાસં સ્વીકૃતવાન્ વિપત્રશરણં ગોવિન્દરાજઃ પ્રભુઃ ।
પદ્મા પદ્મમુખી ચકાર વસતિં મઙ્ગાપુરે યત્પ્રિયા
    તસ્મૈ નિત્યમિદં નમો ભગવતે શ્રીવેઙ્કટેશાય મે ॥ ૪॥

રમ્યે પર્વતસપ્તકે વિરચિતો યસ્યાસ્તિ દેવાલયઃ
    પાષાણૈઃ સુદૃઢૈર્વિનિર્મિતદૃઢપ્રાકારસંવેષ્ટિતઃ ।
ઉત્તુઙ્ગઃ કલશઃ સુવર્ણખચિતો યન્મન્દિરે રાજતે
    તસ્મૈઃ નિત્યમિદં નમો ભગવતે શ્રીવેઙ્કટેશાય મે ॥ ૫॥

મત્સ્યોઽભૂત્ પ્રથમં તતઃ સમભવત્ કર્મો વરાહશ્ચ યઃ
    પ્રહ્લાદસ્ય કૃતે નૃસિંહતનુભાગ્ યો વામનો ભાર્ગવઃ ।
રામો યશ્ચ હરિસ્તથા ચ સુગતો યઃ સ્યાચ્ચ કલ્કિઃ કલૌ
    તસ્મૈ નિત્યમિદં નમો ભગવતે શ્રીવેઙ્કટેશાય મે ॥ ૬॥

ગ્રામો વેઙ્કટપર્વતે તિરુમલા વૈકુણ્ઠલોકોઽપરઃ
    તત્રૈતત્ સકલં હિરણ્યબહુલં લોકાતિગં વૈભવમ્ ।
“આનન્દે નિલયે” સુવર્ણરચિતે રમ્યે વિમાનેઽસ્તિ યઃ
    તસ્મૈ નિત્યમિદં નમો ભગવતે શ્રીવેઙ્કટેશાય મે ॥ ૭॥

મૂર્તિકૃષ્ણમયી સુલલિતા યા દૃષ્ટિસૌખ્યપ્રદા
    યામાયાન્તિ વિલોકિતું પ્રતિદિનં ભક્તાશ્ચ લક્ષાધિકાઃ ।
સ્વર્ણં રત્નયુતં ચ હીરકમયં યસ્યાતુલં વૈભવં
    તસ્મૈ નિત્યમિદં નમો ભગવતે શ્રીવેઙ્કટેશાય મે ॥ ૮॥

વક્તું દ્રષ્ટુમપિ પ્રભુર્ન મનુજો યત્પ્રેરણાયા ઋતે
    નો ચેત્સત્યમિદં કથં રચયિતું માદૃગ્ જનઃ સ્યાત્ પ્રભુઃ ।
મૂકં યા કુરુતે બૃહસ્પતિસમં હ્યેતાદૃશી યત્કૃપા
    તસ્મૈ નિત્યમિદં નમો ભગવતે શ્રીવેઙ્કટેશાય મે ॥ ૯॥

ભૂસ્ત્વં વારિ કૃશાનુરેવમનિલઃ ખં ભાસ્કરસ્ત્વં શશી
    વિશ્વં સ્થાવરજઙ્ગમાત્મકમિદં ત્વદ્રૂપમેતત્ ખલુ ।
યદ્યદ્ બ્રહ્મતૃણાન્તમેતદખિલં શ્રીવેઙ્કટેશાત્મકં
    ઇત્યેવંવિધભાવના શુભતમા જાગર્તુ શશ્વદ્ હૃદિ ॥ ૧૦॥

વિદ્યાં સત્ત્વવતીં પ્રયચ્છ ભગવન્ ! સત્કીર્તિદાં મેં શુભાં
    વિદ્યાદાનપરાન્ ગુરૂનપિ વિભો ! માં સર્વદા પ્રાપય ।
શ્રદ્ધેયા ગુણિનો ભવન્તુ સુહૃદો યે માં ન જહ્યુઃ ક્વચિત્
    યલ્લભ્યેત મયા તવૈવ કૃપયા તેનાસ્તુ તુષ્ટિર્મમ ॥ ૧૧॥

ઇતિ શ્રીવેઙ્કટેશ્વરસ્તુતિમણિમાલા સમાપ્તા ।

રચનાકારઃ પં. પુ. મ. જોશી (સાંગલી)

Composed by Pandit Pu. Ma. JoshI from Sangali

Encoded and proofread by Mandar Mali aryavrutta at gmail.com

*shrIve NkaTeshvarastutimaNimAlA*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*